(दुष्ट आचारो यस्य।) निन्दिताचारवति, त्रि॥ (यथा, देवीभागवते। १।११।१६।
"महापातकयुक्तश्च दुराचारोऽतिगर्हितः॥")

दुराधर्षः, पुं, (दुष्टान् यज्ञविघ्नकारिराक्षसादीन् आधर्षति दूरीकरोतीति। धृष्+अच्।) गौरसर्षपः। इति राजनिर्घण्टः॥ (विष्णुः। यथा, महाभारते। १३।१४९।२२।
"अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान्।"
"दैत्यादिभिर्धर्षयितुं न शक्यते इति दुराधर्षः।"
इति तद्भाष्ये शङ्करः॥ दुःखेन आ ईषदपि धर्षयितुमशक्यः इति। धृष्+"ईषद्दुःसुषु" इति। ३।३।१२६। इति खल्।) अधर्षणीये, त्रि॥ (यथा, महाभारते। ६।१९। ३२।
"भीमसेनो गदां भीमां प्रकर्षन् परिघोपमाम्।
प्रचकर्ष महासैन्यं दुराधर्षो महामनाः॥")

दुराधर्षा, स्त्री, (दुराधर्ष+स्त्रियां टाप्।) कुटुम्बिनीवृक्षः। इति राजनिर्घण्टः॥

दुरारुहः, पुं, (दुःखेन आरुह्यते इति। दुर्+आ+रुह+घञर्थे कर्म्मणि कः।) विल्वः। नारिकेलः। इति राजनिर्घण्टः॥ (दुःखारोहणीये, त्रि। यथा, महाभारते। ३। १४७।६१।
"क वा त्वयाद्य गन्तव्यं प्रब्रूहि पुरुषर्षभ!।
अतःपरमगम्योऽयं पर्व्वतः सुदुरारुहः॥")

दुरारुहा, स्त्री, (दुरारुह+टाप्।) खर्ज्जूरी। इति राजनिर्घण्टः॥

दुरारोहः, पुं स्त्री, (दुःखेन आरुह्यते इति। रुह+कर्म्मणि खल्।) शरटः। इति राजनिर्घण्टः॥ दुःखारोहणीये, त्रि॥ (यथा, महाभारते। ४।५।१४।
"इयं कूटे मनुष्येन्द्र! गहने महती शमी।
भीमशाखा दुरारोहा श्मशानस्य समीपतः॥")

दुरारोहा, स्त्री, (दुरारोह+टाप्।) शाल्मलिवृक्षः। इति त्रिकाण्डशेषः॥ श्रीवल्ली। इति राजनिर्घण्टः॥

दुरालभा, स्त्री, (दुःखेन आलभ्यते स्पृश्यते स्पृशति वा। दुर्+आ+लभ+खल्+टाप्। आगमविधेरनित्यत्वात् न नुम्।) स्वनामख्यातकण्टकयुक्तक्षुद्रवृक्षविशेषः। स यवासप्रभेदः। हिन्दुषा इति ख्याता। तत्पर्य्यायः। दुरालम्भा २ धन्वयासः ३ ताम्रमूला ४ कच्छुरा ५ दुस्पर्शा ६ धन्वी ७ धन्वयवासकः ८ प्रबोधनी ९ सूक्ष्मदला १० विरूपा ११ दुरभिग्रहा १२ दुर्लभा १३ दुःप्रधर्षा १४। इति राजनिर्घण्टः॥ यासः १५ यवासः १६ दुस्पर्शः १७ कुनाशकः १८ रोदनी १९ अनन्ता २० समुद्रान्ता २१। इत्यमरः। २।४।९२॥ गान्धारी २२ कार्य्या २३। इति भावप्रकाशः॥ धनुर्यासः २४ युवसः २५ कच्छरा २६। इति शब्दरत्नावली॥ विकण्टकः २७। इति जटाधरः॥ (पद्ममुखी २८। इति शब्दचन्द्रिका॥) अस्या गुणाः। खरस्त्वम्। ज्वरच्छर्द्दिश्लेष्मपित्तविसर्पवेदनानाशित्वञ्च। इति राजवल्लभः॥ कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। सारत्वम्। अम्लत्वम्। मधुरत्वम्। वातगुल्मप्रमेहनाशित्वञ्च। इति राजनिर्घण्टः॥
"यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा॥"
इति भावप्रकाशः॥
(गङ्गा। यथा, काशीखण्डे। २९। ८८।
"दीर्घव्रता दीर्घदृष्टिर्दीर्घतोया दुरालभा॥")
दुरालभनीये, त्रि॥

दुरालम्भा, स्त्री, (दुःखेन आलभ्यते इति। दुर्+आ+लभ+खल्+नुम् च।) दुरालभा। इति राजनिर्घण्टः॥ (यथा, महाभारते। १३। ९८।३१।
"तीक्ष्णवीर्य्यास्तु भूतानां दुरालम्भाः सकण्टकाः।
रक्तभूयिष्ठवर्णाश्च कृष्णाश्चैवोपहारयेत्॥")

दुरालापः, पुं, (दुर्दुष्ट आलापः इति प्रादिसमासः।) गालिः। इति शब्दार्थकल्पतरुः॥

दुरासदः, त्रि, (दुःखेन आसद्यते इति। दुर्+आ+सद्+"ईषद्दुःसुषु इति।" ३।३।१२६। इति खल्।) दुष्प्राप्यः। यथा,—
"दुरासदो दुर्विषहो भूतानां स बभूव ह॥"
इति श्रीभागवतम्॥
(यथा च, देवीभागवते। १।१०।३२।
"धर्म्मस्य पुरतः प्राप्ते कामभावे दुरासदे॥"
(दुष्प्रवेशः। यथा, माघे। १६।१०।
"घनजालनिभैर्दुरासदाः
परितो नागकदम्बकैस्तव।
नगरेषु भवन्तु वीथयः
परिकीर्णा वनजैर्मृगादिभिः॥")

दुरितं, क्ली, (इण् भावे+क्तः। दुष्टमितं गमनं नरकादिदुर्गतिप्राप्तिर्यस्मात्।) पापम्। इत्यमरः। १।४।२३॥ (यथा, रघौ। ८।२।
"दुरितैरपि कर्त्तुमात्मसात्
प्रयतन्ते नृपसूनवो हि यत्॥")
तद्वति, त्रि॥

दुरितदमनी, स्त्री, (दुरितं पापं दम्यते यया इति। दम+करणे ल्युट्। ङीप् च।) शमी। इति राजनिर्घण्टः॥ (दम+ल्युः।) पापनाशिनी च॥

दुरिष्टकृत्, पुं, (दुरिष्टम् अभिचारयज्ञं करोतीति। दुरिष्ट+कृ+क्विप् तुगागमश्च।) अभिचारकर्त्ता। तस्य नरकं यथा,—
"देवद्विजपितृन् द्वेष्टा रत्नदूषयिता च यः।
स याति कृमिभक्षे वै कृमीशे च दुरिष्टकृत्॥"
इति विष्णुपुराणे। २।६।१४॥
"दुरिष्टकृत् अभिचारकर्त्ता।" इति तट्टीका॥

दुरिष्ठः त्रि (दुर्+इष्ठन्।) अतिमन्दः। अयमनयोरेषां वा अतिशयेन दुः निन्दितः। इति व्याकरणम्॥

दुरीषणा, स्त्री, (दुर्दुष्टा ईषणा इच्छाभिशंसनम्। प्रादिसमासः।) शापः। इति शब्दार्थकल्पतरुः॥

दुरूहः, त्रि, (दुःखेन ऊह्यते इति। दुर्+ऊह+कर्म्मणि खल्।) दुर्विज्ञेयः। यथा,—
"काव्यप्रकाशस्य दुरूहपङ्क्ती-
र्गदाधरो व्याकुरुते प्रयत्नात्॥"
इति गदाधरभट्टाचार्य्यकृतकाव्यप्रकाशटीका॥

दुरोदरं, क्ली, (दुर्दुष्टमासमन्तादुदरं यस्य। दुष्टमुदरमस्य वा। पृषोदरादित्वात् साधुः।) द्यूतभेदः। पाशकक्रीड़ा। इत्यमरः। ३।३।१७१॥ (यथा, वक्रोक्तिपञ्चाशिकायाम्। २६।
"अर्थं किं तनुषे दुरोदरमिदं न स्वापतेयं तव॥")

दुरोदरः, पुं, (दुष्टं आ समन्तात् उदरं यस्य।) द्यूतकृत्। (यथा, महाभारते। २।५६।९।
"दुरोदरा विहिता ये तु तत्र
महात्मना धृतराष्ट्रेण राज्ञः॥")
पणः। इति मेदिनी। रे, २६७॥

दुर्गं, क्ली, (दुःखेन गच्छत्यत्र। दुर्+गम+"सुदुरोरधिकरणे।" ३।२।४८। इत्यस्य वार्त्तिकोक्त्या डः।) पर्व्वतादिभिर्दुर्गमं पुरम्। इत्यमरः। २।८।१७॥ गड़ इति कोल्ला इति च भाषा॥ तत्पर्य्यायः। कोट्टम् २। यथा,—
"स्कन्धावारो राजधानी कोट्टदुर्गे पुनः समे॥"
इति हेमचन्द्रः॥
"अथ कोट्टो राजधानी राजधानकमित्यपि।"
इति शब्दरत्नावली।
"पुरं दुर्गमधिष्ठानं कोट्टोऽस्त्री राजधान्यपि।"
इति जटाधरः॥
तत्तु बहुविधम्। यथा,—
"तत्र दुर्गं नृपः कुर्य्यात् षसामेकतमं बुधः।
धन्वदुर्गं महीदुर्गं नरदुर्गं तथैव च॥
वार्क्षञ्चैवाम्बुदुर्गञ्च गिरिदुर्गञ्च पार्थिव!।
सर्व्वेषाञ्चैव दुर्गाणां गिरिदुर्गं प्रशस्यते॥
दुर्गञ्च परिखोपेतं वप्राट्टालकसंयुतम्।
शतघ्नीयन्त्रमुख्यैश्च शतशश्च समावृतम्॥"
इति मात्स्ये १६१ अध्यायः॥
राजसत्कृतकरणावश्यकत्वं तच्छुभाशुभत्वञ्च यथा,—
"दुर्गाणि सततं कुर्य्यात् प्राकाराट्टालतोरणैः।
दूषितान्नगराद्राजा दुर्गं दुर्गाश्रयं चरेत्॥
दुर्गं बलं नृपाणान्तु नित्यं दुर्गं प्रशस्यते।
शतमेको योधयति दुर्गस्थो यो धनुर्द्धरः॥
शतं दश सहस्राणि तस्मात् दुर्गं प्रशस्यते।
जलदुर्गं भूमिदुर्गं वृक्षदुर्गं तथैव च॥
आरण्यवनदुर्गञ्च शैलजं परिखोद्भवम्।
दुर्गं कार्य्यं नृपतिना यथायोग्यं स्वदेशतः॥
दुर्गं कुर्व्वन् पुरं कुर्य्यात् त्रिकोणं धनुराकृति॥
वर्त्तुलं वा चतुष्कोणं नान्यथा नगरं चरेत्।
मृदङ्गाकृति दुर्गञ्च सततं कुलनाशनम्॥
यथा राक्षसराजस्य लङ्कादुर्गा जिता पुरा॥
बलेः पुरी शोणिताख्यं तेजो दुर्गं प्रतिष्ठितम्।
यतस्तत् व्यजनाकारमतो भ्रष्टश्रियो बलिः॥
सौभाग्यं शाल्वराजस्य नगरं पञ्चकोणकम्।
दिवि यद्वर्त्तते राजंस्तच्च भ्रष्टं भविष्यति॥